# Shivagauri Stotram

# શિવગૌરીસ્તોત્રમ્

## Document Information

Text title : Shivagauri Stotram

File name : shivagaurIstotram.itx

Category : shiva, stotra, pAravtI, devii, devI

Location : doc_shiva

Proofread by : Sivakumar Thyagarajan Iyer

Description/comments : 40 in Stotrasamuchchaya 1, Edited by Pandit K. Parameshwara Aithal

Latest update : September 23, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 23, 2023

*sanskritdocuments.org*

# શિવગૌરીસ્તોત્રમ્

ૐ શ્રીગણેશાય નમઃ ।

સૃણિપાશપુષ્પશરપુણ્ડ્રચાપકૈઃ
    કરપઙ્કજૈઃ કલિતભક્તવાઞ્છિતામ્ ।
તરુણારુણારુણતનું ત્રિલોચનાં
    લલિતાં ભજે લલિતચન્દ્રચૂલિકામ્ ॥ ૧॥

લલિતાવિભૂષિતનિજાઙ્ગમૂર્તયે લલિતેષુચાપસૃણિપાશપાણયે ।
ઉદયારુણદ્યુતિમુષે દયાજુષે મદનેશ્વરાય મહતે નમો નમઃ ॥ ૨॥

અઞ્ચત્પઞ્ચશિખોઞ્ચમઞ્ચનિકટે ચક્રાસનાધ્યાસિનીં
    સૌન્દર્યસ્ય મહીં નવાબ્દવયસં ગૌરીં કુલાલાપિનીમ્ ।
માલાપુષ્પસૃણીગુણાઞ્ચિતકરાં પૂગપ્રમાણસ્તનીં
    બાલાં શ્રીલલિતામ્બિકાદુહિતરં લીલાસમુદ્રાં ભજે ॥ ૩॥

ચિન્તામણિગ્રહવરાઞ્ચિતશક્તિચક્ર
    રક્ષાકરં કલિતકુઙ્કુમરક્તવર્ણમ્ ।
સૌન્દર્યરાશિવપુષં દશવર્ષદેશ્યં
    વન્દે કુમારમદનેશ્વરમિન્દુમૌલિમ્ ॥ ૪॥

અપરાજિતનામધેયમશ્વં સુખમારૂઢવતી સુવર્ણવર્ણા ।
વિલસન્મણિવેત્રપાશહસ્તા પરિભૂયાત્ પરમેશ્વરી સપત્નાન્ ॥ ૫॥

અધિરુહ્ય જપારુણં તુરઙ્ગં કરપદ્માઞ્ચિતવેત્રપાશશક્તિઃ ।
પરિભૂતવિપક્ષપક્ષકોઽવ્યાદરુણાભઃ પરમેશ્વરીસહાયઃ ॥ ૬॥

રક્તાં વિચિત્રવસનાં નવચન્દ્રચૂડા-
    મન્નપ્રદાનનિરતાં સ્તનભારનમ્રામ્ ।
નૃત્યન્તમિન્દુશકલાભરણં વિલોક્ય
    હૃષ્ટાં ભજે ભગવતીં ભવદુઃખહન્ત્રીમ્ ॥ ૭॥

ઉદઞ્ચિતાકુઞ્ચિતવામપાદં સમઞ્ચિતાહીન્દુકૃશાનુહસ્તમ્ ।
અન્નપ્રદાં વીક્ષ્ય મુદા મહેશીં નટન્તમાદ્યં નટમાશ્રયામઃ ॥ ૮॥

અરુણારુણકોટિતુલ્યકાન્તિં સૃણિપાશાભયવાઞ્છિતપ્રદાનૈઃ ।
અનુરક્તકરાં નવેન્દુચૂડામખિલેશીં ભુવનેશ્વરીં ભજામઃ ॥ ૯॥

બાલેન્દુકલિતોત્તંસં બાલારુણસમદ્યુતિમ્ ।
પાશાઙ્કુશવરાભીતિકરં શમ્ભું સમાશ્રયે ॥ ૧૦॥

કુલાચલકુતૂહલં કુસુમચાપસઞ્જીવનં
કુચે કલિતવલ્કલં ગુરુકૃપારસં લોચને ।
જપાસહૃદયં રુચૌ જપવટાભિરામં કરે
જટાનિબિડિતં કચે જયતિ જીવિતં શામ્ભવમ્ ॥ ૧૧॥

દત્તાત્રેયં શિવં શાન્તમિન્દ્રનીલનિભં પ્રભુમ્ ।
આત્મમાયારતં દેવમવધૂતં દિગમ્બરમ્ ॥ ૧૨॥

ભસ્મોદ્ધૂલિતસર્વાઙ્ગં જટાજૂટધરં વિભુમ્ ।
ચતુર્બાહુમુદારાઙ્ગં પ્રફુલ્લકમલેક્ષણમ્ ॥ ૧૩॥

જ્ઞાનયોગનિધિં વિશ્વગુરું યોગિજનપ્રિયમ્ ।
ભક્તાનુકમ્પિનં સર્વસાક્ષિણં સિદ્ધસેવિતમ્ ॥ ૧૪॥

એવં યઃ સતતં ધ્યાયેદ્ દેવદેવં સનાતનમ્ ।
સ મુક્તઃ સર્વપાપેભ્યો નિઃશ્રેયસમવાપ્નુયાત્ ॥ ૧૫॥

ઇતિ શ્રીશિવગૌરીસ્તોત્રં સમ્પૂર્ણમ્ ।

(૪૦)

Proofread by Sivakumar Thyagarajan Iyer

*Shivagauri Stotram*

pdf was typeset on September 23, 2023

Please send corrections to *sanskrit@cheerful.com*